# व्रजमाधुरी



विद्वद्धौरेयाणां
प्रो. डॉ. व्रजकिशोरनायकमहोदयानाम्
अभिनन्दनग्रन्थः

Scanned by CamScanner

व्रजमाधुरी

पुरातनछात्रसंसदद्वाराप्रस्तुतः
अभिनन्दनग्रन्थः

प्रकाशनकालः - २०१५

प्रकाशिका -
**श्रीपर्ण्णा प्रकाशनी**
उदयराग कम्प्लेक्स, सिपसुरुबुली
बलिआपण्डा, पुरी-१ (ओड़िशा)

स्वत्वाधिकारिणी -
**पुरातनछात्रसंसद्,** साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी, ओडिशा

डि.टि.पि
**कालिआ डिटिपि सेन्टर**
मोचिसाहि, पुरी

मुद्रणम्
**एच्.पी.कम्पुटरर्स**
क्लार्क रोड, पुरी

मूल्यम्-
201/- रूप्यकाणि

ISBN. 81-87175-65-6

Scanned by CamScanner

# वेदेषु मनसः आध्यात्मिकस्वरूपम्

डॉ. शत्रुघ्नपाणिग्राही

सर्वेषामेव प्राणिनामाभ्यन्तरस्थरूपेण विराजते महती काचन सत्ता, स वै शक्तिः मन इति नाम्ना ज्ञायते । 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इति वचनानुसारं कैवल्यप्राप्त्यर्थं मनसः स्थिरीकरणाय वेदस्य महत्त्वपूर्णं स्थानं विद्यते । वेदः भवति यज्ञप्रधानः । यज्ञसम्पादनमेव वेदस्य मूलविषयः । यज्ञसम्पादनमेव ब्रह्मसम्पादनमिति कथ्यते । गोपथब्राह्मणानुसारं मनः ब्रह्मस्वरूपम् । श्रूयते यथा— 'मनो वै ब्रह्म'[१] इति अपि च— 'वागिति मनः'[२], 'वाङ्मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितम्'[३], 'वाग्वै समुद्रो मनः'[४] पुनश्च विराट्पुरुषस्य मानसिकयज्ञादेव सृष्टिरियं सञ्जाता इति पुरुषसूक्ताज्ज्ञायते । अतः मन एव सृष्टेः मूलकारणं वर्तते । एतदर्थं यज्ञकर्मणि मनसः संस्कारविषये छान्दोग्योपनिषदि श्रूयते—

''एष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी ।''[५] इति ।

इदानीमाधुनिकसमाजे मनोविज्ञानविद्वद्भिर्मनसः विषये यः महत्प्रयासः क्रियते तत्सर्वं बीजरूपेण वेदे संदृश्यते । निरुक्तकारो यास्कः स्वकीयनिरुक्तग्रन्थे मनुष्यः कस्मादिति विषये प्रतिपादयति— ''मनस्यमानेन सृष्टाः । मनस्यतिः पुनर्मनस्वी भावे ।''[६] इति ।

मनस्यमानेन प्रजापतिना मनस्विभावे सृष्टं मनः देवाधीनं वर्तते । देवाः मनुष्यस्य मनः आसमन्तात् जानन्तीति शतपथब्राह्मणे दृश्यते । यथा—

''मनो ह वै देवा मनुष्यस्याजानन्ति ।''[७] इति ।

वेदमन्त्राणामनुशीलनेन ज्ञायते यत् सर्वासां शक्तीनां स्रोतो मन एव वर्तते । मनस्विनो मनसि महान् वेगो भवति अत एव महद्भिर्वेदविद्भिर्मनसो वेगो वायोरपि महत्तरइति कथितम् । श्रूयते यथा वायुः चलति तथैव मनः । यथा— ''वातो वा मनो वा'' इति । येन मनोबलेन पुरुषो दूरस्थोऽप्यदूरस्थ इव अदूरस्थोऽपि



Scanned by CamScanner

दूरगम एव भवति तन्मनोबलं दिव्यं ब्रह्मस्वरूपञ्च । श्रूयते अथर्ववेदे—

यथा देवा देवान् हविषा यजन्त अमर्त्यान् मनसाऽमर्त्येन ।
मदेम तत्र परमे व्योमन् पश्येम तदुदितौ सूर्यस्य ॥

अतः इदानीं ये खलु मनोविज्ञानवेत्तारः स्नायुमण्डलं, संवेदनां, प्रत्यक्षीकरणं, ध्यानं, शिक्षणं, कल्पनां, स्मरणं, विस्मरणं, बुद्धिं, योग्यतां, व्यक्तितत्वं, चिन्तनम्, अनुभूतिं, संवेगं, प्रेरणां, स्वप्नं, वंशानुक्रमतां, सफलतां विफलताञ्च सम्परीक्ष्य मनोविज्ञानताविषये जानन्ति, तत्सर्वं वेदार्थानुशीलनेन ज्ञातुं शक्यते । श्रूयते अर्थर्ववेदे यथा—

मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥ इति ।

ऋग्वेदे दृश्यते यत् मन एव अक्षयं ज्ञानं प्रददाति । परमात्मना ज्ञानमयेन तपसा मनसा वेदत्रयी धृता । शरीरे वर्तमानः प्राणवायुरेव मनसा अभिहितेनाग्निना प्रेरितो भूत्वा स्वरोत्पादकः भवति । यथा—

''यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ॥ इति ।

हविर्ग्रहणेऽपि अस्य योगदानं वर्तते । यथा- ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसि पुनश्च मनीषिणः तेजस्विनीं ज्योतिष्मतीं सत्यवाचं मनसि संस्थाप्य तपोबलेन तामदुतीर्य जगत्कल्याणाय प्रवर्तन्ते यथा—

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद गर्भऽन्तः ।
तां द्योतमानां स्वर्यं मनीषिणाम् ऋतस्य पदे कवयो निपान्ति ॥

शुक्लयजुर्वेदस्यानुशीलनेन ज्ञायते सर्वासां प्रजानां चित्रं यत्र सर्वत्र ओतं भवति तदेव मन इति । जाग्रतः पुरुषस्य यथा मनो सदूरमपि समीपमपि स्वगतिं करोति तथैव सुप्तस्यापि पार्श्ववर्ति दूरवर्ति च भवति । एतन्मनः सर्वासां ज्योतिषां ज्योतिः मनः शिवसङ्कल्पयुक्तं भवत्विति प्रार्थना वेदेषु वर्तते । यथा—

ॐ यज्जाग्रतो दूरमुदैति दैवं तदुसुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं मन्मे मनः शिवसङ्कल्पमस्तु ॥



Scanned by CamScanner

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
मनो पुवंगमा धम्मा मनोसेट्ठा मनोमया ।
मनसा च प्रसन्नेन भासति वा करोति वा ।
ततो नं सुखमन्वेतिच्छाया व अनपायिनी ।। इति ।

शतपथब्राह्मणे मनसः विभिन्नरूपत्वं यथा- कामः (इच्छा), सङ्कल्पः (विचारः), विचिकित्सा (सन्देहः), श्रद्धा, धृतिः, अधृतिः (अधीरता), ह्रीः (लज्जा), धीः (ज्ञानम्), भीः (भय), स्वीक्रियते यथा- कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिह्रीधिभी-रित्येतसर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति । अतः निष्कर्षरूपेण वक्तुं शक्यते यत् ब्रह्मप्राप्तेः साधु साधनं मनसः स्थिरीकरणमेव वर्तते । तदर्थं मनसः स्थिरीकरणाय श्रुतिः उपदिशति विश्वबन्धुत्वभावम् अन्वेषणीयम्—

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ।। इति ।

—०—

Scanned by CamScanner